# Shri Chidambareshadashashloki Stutih

# શ્રીચિદમ્બરેશદશશ્લોકી સ્તુતિઃ

## Document Information

Text title : Shri Chidambareshadashashloki Stutih

File name : chidambareshadashashlokIstutiH.itx

Category : shiva, dashaka, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીચિદમ્બરેશદશશ્લોકી સ્તુતિઃ

ઉપમન્યુમહર્ષિપ્રણીતા

કૃપાસમુદ્રં સુમુખં ત્રિનેત્રં જટાધરં પાર્વતિવામભાગમ્ ।
સદાશિવં રુદ્રમનન્તરૂપં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૧॥

કલ્યાણમૂર્તિં કનકાદ્રિચાપં કાન્તાસમાક્રાન્તનિજાર્ધદેહમ્ ।
કાલાન્તકં કામરિપું પુરારિં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૨॥

વિશાલનેત્રં પરિપૂર્ણગાત્રં ગૌરીકલત્રં દનુજારિબાણમ્ ।
કુબેરમિત્રં સુરસિન્ધુશીર્ષં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૩॥

વેદાન્તવેદ્યં ભુવનૈકવન્દ્યં માયાવિહીનં કરુણાર્દ્રચિત્તમ્ ।
જ્ઞાનપ્રદં જ્ઞાનિનિષેવિતાઙ્ઘ્રિં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૪॥

દિગમ્બરં શાસિતદક્ષયજ્ઞં ત્રયીમયં પાર્થવરપ્રદં તમ્ ।
સદાદયં વહ્નિરવીન્દુનેત્રં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૫॥

વિશ્વાધિકં વિષ્ણુમુખૈરુપાસ્યં ત્રિકોણગં ચન્દ્રકલાવતંસમ્ ।
ઉમાપતિં પાપહરં પ્રશાન્તં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૬॥

કર્પૂરગાત્રં કમનીયનેત્રં કંસારિવન્દ્યં કનકાભિરામમ્ ।
કૃશાનુઢક્કાધરમપ્રમેયં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૭॥

કૈલાસવાસં જગતામધીશં જલન્ધરારિં પુરુહૂતપૂજ્યમ્ ।
મહાનુભાવં મહિમાભિરામં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૮॥

જન્માન્તરારૂઢમહાઘપઙ્કિલપ્રક્ષાલનોદ્ભૂતવિવેકતશ્ચ યમ્ ।
પશ્યન્તિ ધીરાઃ સ્વયમાત્મભાવાત્ ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૯॥

અનન્તમદ્વૈતમજસ્રભાસુરં હ્યતર્ક્યમાનન્દરસં પરાત્પરમ્ ।
યજ્ઞાધિદૈવં યમિનાં વરેણ્યં ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૧૦॥

વૈયાઘ્રપાદેન મહર્ષિણા કૃતાં ચિદમ્બરેશસ્તુતિમાદરેણ ।

પઠન્તિ યે નિત્યમુમાસખસ્ય પ્રસાદતો યાન્તિ નિરામયં પદમ્ ॥ ૧૧॥

ઇતિ ઉપમન્યુમહર્ષિપ્રણીતા શ્રીચિદમ્બરેશદશશ્લોકી સ્તુતિઃ સમાપ્તા ।

(This is similar to existing chidambareshastutiH but
this has 10 verses with variations, so kept separate)

Proofread by Aruna Narayanan

*Shri Chidambareshadashashloki Stutih*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*